National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 17-19
© 2026 NJHSR
www.sanskritarticle.com

**आराध्युल रमेशः**
शोधच्छात्रः, शुक्लयजुर्वेद काण्वशाखा,
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**आराध्युल रमेशः**
शोधच्छात्रः, शुक्लयजुर्वेद काण्वशाखा,
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

# शुक्लयजुर्वेदे स्वरभक्तिः

**आराध्युल रमेशः**

सर्वैर्ज्ञायते यत् वेदः ज्ञानसाधनमिति। किन्तु वेदः किंविषयकज्ञानस्य साधनमिति जायते आकाङ्क्षा।

तत्र शङ्करभगवत्पादाचार्याः आहुः **सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः, सर्वपुरुषाणां निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात्**[1] इति। इष्टप्राप्त्यै अनिष्टपरिहाराय अपेक्षितानाम् उपायानां प्रकाशनं करोति वेदः इति तेषामाशयः गम्यते। तच्च **दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत** इत्यादि।

**कर्मसु मन्त्रोच्चारणस्यावश्यकता**

तत्र जायते आकाङ्क्षा स्वर्गसाधनाय दर्शयागः कर्तव्यः इति वेदवाक्येन ज्ञायते, कथं तत्कर्तव्यम् इति। तच्च इतिकर्तव्यता इति व्यवह्रियते मीमांसकैः। तत्रापि वेद एव प्रमाणम्। तत्र यागङ्गत्वेन बहवो विधयः दृश्यन्ते। तेषु अन्यतमः मन्त्रोच्चारणमपि। तदाह श्रौतसूत्रे भगवान् कात्यायनः **मन्त्रान्तैः कर्मादिः सान्निपात्योऽभिधानात्**[2] इति। अस्मिन् विषये **अनियमं वात्स्यः**[3] इति सूत्रेण पक्षान्तरमुक्त्वा पुनः स्वपक्षस्तु पूर्वोक्त एवेति **आर्दि त्वाचार्याः**[4] इति तुशब्दघटितेन सूत्रेण सूत्रकाराः प्रतिपादयन्ति।

तत्र भाष्ये भाष्यकृता कर्काचार्येण उच्यते – **न अनियमः मन्त्रान्ते एव कर्मादिमाचार्याः इच्छन्ति यत्कारणं मन्त्रेण स्मृतं कर्म कर्तव्यम्**[5]। इति। उच्यते च

**अनुष्ठाने पदार्थानामवश्यम्भाविनी स्मृतिः।**
**अनन्यसाधनानन्यकार्यैर्मन्त्रैः प्रसाध्यते॥**

मन्त्रो नाम द्रव्यदेवतास्मारकः। तादृशेन मन्त्रेण स्मृत्वा कर्म कर्तव्यमिति नियमः उपलभ्यते। एवं च कर्माचरणे मन्त्रोच्चारणमपि मुख्यमङ्गं भवतीति ज्ञायते।

**दोषरहितमन्त्रोच्चारणस्यावश्यकता**

एतावत् प्राधान्यं वहतः मन्त्रोच्चारणस्य कर्मणां साफल्यतासिद्धौ अस्ति महती पात्रता। तदुच्यते शिक्षायां –

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्**[6]॥ इति।

मन्त्रस्तु पदसमुदायः अथवा वाक्यसमुदायो भवति। वाक्यं पुनः पदसमुदायः, पदं वा इति विदुषां विदितमेव। **तत्समुदायोऽक्षरम्**[7], **वर्णो वा**[8], **अक्षरसमुदायः पदं**[9], **अक्षरं वा**[10], इति सूत्रैः अक्षरपदयोः स्वरूपं भगवता कात्यायनेन प्रातिशाख्ये प्रतिपादितम्। एवं च वर्णज्ञाने अक्षर ज्ञानं, तज्ज्ञाने पदज्ञानं, तेन वाक्यज्ञानं, ततः मन्त्रज्ञानं च भवतीति स्पष्टम्। सत्येव मन्त्रज्ञाने गुरुमुखाध्यायनाभ्यासयोश्च कृतयोः मन्त्रोच्चारणं अदुष्टमहीनं च कर्तुं शक्यते। अदुष्टे मन्त्रोच्चारणे एव कर्म साङ्गं फलयुक्तं च भवतीति वर्णज्ञानस्य अपेक्षा वैदिकानां नितान्तं वर्तते इत्यत्र नास्ति संशीतिः। तेषु वर्णेषु स्वरभक्तिरप्येका।

**स्वरभक्तेः वर्णत्वविचारः**

ननु स्वरभक्तेः वर्णत्वं न स्यात्। वाजसनेयिप्रातिशाख्ये अक्षरसमाम्नाये अनुपदेशात्। उपदिष्टानां च वर्णानां एते पञ्चषष्टिवर्णाः **ब्रह्मराशिरात्मन्वाचः**[11] इति

संख्यया परिगणनस्य कृतत्वादिति चेदुच्यते, **एते पञ्चषष्टिवर्णाः**[12] इति सूत्रेण परिगणनं न क्रियते किन्तु सम्भवाभिप्रायेण कथ्यते। तथाहि **तस्मिन् ळह्ळजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम्**[13] इति सूत्रेण तत्र अनुपदिष्टयोरपि ळह्ळयोः निषेधकथनात् तेषामपि वर्णत्वं ज्ञापितम्। तद्वारा अक्षरसमाम्नाये अनुपदिष्टानामपि विधिसूत्रैः विहितानां वर्णत्वं ज्ञाप्यते। तादृशेषु स्वरभक्तिरप्येका।

**<u>शुक्लयजुर्वेदलक्षणग्रन्थेषु स्वरभक्तेः प्रस्तावः</u>**

वाजसनेयिप्रातिशाख्ये स्वरभक्तिरिति नाम्ना न किञ्चिदुक्तम्। तथापि चतुर्थाध्याये सप्तदशतमेन सूत्रेण स्वरभक्तिः विधीयते। तदनुसृत्य वर्णरत्नप्रदीपिकाशिक्षायामपि स्वरभक्तिविषयकं श्लोकत्रयं दृश्यते। तथैव प्रतिज्ञापरिशिष्टे स्वरभक्तेः उच्चारणप्रकारः उक्तः। याज्ञवल्क्यशिक्षायां सप्तभिः श्लोकैः स्वरभक्तिः उपदिष्टा। किञ्च तत्र उपदेशक्रमे कश्चन विलक्षणः पन्थाः दृश्यते। आदौ स्वरभक्तिभेदान् तत्संज्ञाभिः उपदिश्य, तदनु संज्ञाभेदेन तत्तत्प्रदेशान् प्रदर्श्य, ततः उदाहरणानि उक्त्वा, ततः पश्चात् स्वरभक्तिलक्षणमुक्त्वा अनन्तरं उच्चारणे सम्भावितान् दोषान् उपदिदेश।

**<u>स्वरभक्तेः लक्षणम्</u>**

**रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः।**
**स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्यपठ्यते**[14]**॥**

रेफलकाराभ्यां परे यत्र अच्पराः उष्माणः स्युः। तत्र मध्ये स्वरभक्तिर्भवति। सा च पूर्वाङ्गं भवति इति श्लोकार्थः। तथाहि - **यस्या योनिर्हिरण्ययी**[15] इति। अत्र **योनिः, हिरण्ययी** इति पदविभागः। योनिः इत्यत्र पदान्ते विद्यमानः विसर्गः भाव्युपधः[16]। भाविसंज्ञकवर्णः उपधा यस्य सः विसर्गः भव्युपधः इत्युच्यते। प्रकृते विसर्गस्तथाभूतः। अनन्तरं धिसंज्ञकवर्णो[17] हकारो विद्यते इत्यतः **रेफं स्वरधौ**[18] इति प्रातिशाख्यसूत्रेण विसर्गस्य स्थाने रेफः वक्तव्यः। योनिर्हिरण्ययी इति। एवं रेफोष्मसंयोगः प्रकृतोदाहरणे सिद्धः। तत्र तयोः रेफोष्मयोर्मध्ये स्वरभक्तिः वक्तव्या। इति स्वरभक्तिलक्षणम्।

प्रातिशाख्ये भगवान् कात्यायनः **रलावृऌवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र**[19] इति सूत्रेण तस्याः स्वरभक्तेः आगमत्वमुक्तम्। तथाहि – सूत्रे ऋऌवर्णाभ्यामिति तृतीयया निर्दिष्टम्। तृतीयाविभक्त्यन्तश्च **तेनेत्यागमः**[20] इति परिभाषया आगमत्वेन तदर्थमुपस्थापयति। अतः प्रातिशाख्ये आगमत्वेन विहतयोरेव अत्र श्लोके अदश्शब्देन परामर्शः कर्तव्यः। एवं च रेफोष्मणोर्मध्ये एव आगमरूपेण स्वरभक्तिर्विधीयते। उच्यते च उव्वटाचार्येण **न चैतौ वर्णौ रेफलकारयोरूष्मणां च मध्यवर्तिनावपि सन्तौ संयोगस्य विघातं कुरुतः**[21] इति।

**<u>स्वरभक्तेः स्वरूपम्</u>**

तत्र स्वरभक्तेः स्वरूपं तु रेफोष्मसंयोगे ऋकारसदृशस्य लकारोष्मसंयोगे ऌकारसदृशस्य च आगमः उक्तः इति कृत्वा तदेव तेषां स्वरूपमिति ज्ञायते। तदुच्यते प्रातिशाख्यस्य व्याख्यायाम् अनन्ताचार्यैः **रेफलकारौ ऋऌवर्णाभ्याम् ऋऌवर्णसदृशश्रवणाभ्यां यथासङ्ख्यं व्यवधीयेते स्वरे परे ऊष्मणि परे सर्वत्र एकपदे भिन्नपदे च**[22] इति। तदेवाह उव्वटाचार्योऽपि। एवं स्वरभक्तेः स्वरूपमुपलभ्यते।

**<u>स्वरभक्तिभेदाः</u>**

याज्ञवल्क्यशिक्षायां विशिष्य स्वरभक्तिभेदाः अपि निरूपिताः। तद्यथा -

**करिणी कुर्विणी चैव हरिणी हरिता तथा।**
**तद्वद्धंसपदा नाम पञ्चैताः स्वरभक्तयः**[23]**॥**

अत्र स्वरभक्तयः पञ्चप्रकाराः संज्ञाभिः उपदिश्यन्ते। करिणी कुर्विणी हरिणी हरिता हंसपदा इति पञ्चस्वरभक्तयः इति श्लोकस्यार्थः।
एवं करिण्यादयः स्वरभक्तिविधाः प्रतिपादिताः। ततः तेषां स्थलानि उच्यन्ते।

**करिणी रहयोर्योगे कुर्विणी लहकारयोः।**
**हरिणी रशयोर्योगे हरिता लशकारयोः॥**
**या तु हंसपदानाम सातु रेफषकारयोः**[24]**।**

रेफहकारयोः संयोगे करिणीनाम्नी स्वरभक्तिर्भवति। तथैव कुर्विणी इति लकारहकारयोः संयोगे, हरिणीति रेफशकारयोस्संयोगे, हरितेति लकारशकारयोस्संयोगे, हंसपदेति स्वरभक्तिः रेफषकारयोः भवतीति च निगदव्याख्यानकोऽयं श्लोकः। लकारषकारयोः संयोगः नोपलभ्यते। रेफसकारयोः संयोगस्तु **मृदं बर्स्वैः**[25] इत्यत्र यद्यपि लभ्यते तथापि उक्तलक्षणरीत्या सकारः अत्र अच्परो नास्तीत्यतः स्वरभक्तिर्न भवत्येव। वस्तुतः रेफात्परस्य सकारस्य मूर्धन्यादेशः व्याकरणप्रातिशाख्याभ्यां प्राप्नोति। अतः तादृशोदाहरणं नोपलभ्यत एव। किन्तु बर्स्वैः इत्यत्र छान्दसत्वात् मूर्धन्यादेशो नेति वक्तव्यम्। लकारसकारयोः संयोगोपि न भवत्येव। अतः पञ्चानामेव स्वरभक्तीनां उपलब्धिः मन्त्रेषु अस्ति। इत उत्तरं आचार्या एतेषामुदारणानि स्वयमेव प्रदर्शयन्ति।

**देवम्बर्हिश्च करिणी उपवल्हेति कुर्विणी।**
**हरिणी दर्शतमिति शतवल्शेति हारिता।**
**वर्षो वर्षीयसीत्याहुस्तथा हंसपदेति च**[26]**॥**

**देवम्बर्हिरिन्द्रम्**[27] इति करिणीस्वरभक्तेः उदाहरणम्। **उपवल्हामसि त्वा**[28] इति कुर्विण्याः उदाहरणम्। **सृजप्रशस्त दर्शतम्**[29] इति हरिण्याः, **देव वनस्पते शतवल्शो विरोह**[30] इति हरितायाः, **वर्षो वर्षीयसि**[31] इति हंसपदास्वरभक्तेः उदाहरणानि।

**<u>स्वरभक्तेः उच्चारणे सम्भाविताः दोषाः</u>**

स्वरभक्तेः उच्चारणे सम्भावितानां दोषाणां निरासाय तान् विवृणोति।

**स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्।**
**इकारं चाप्युकारं च ग्रस्तदोषं तथैव च**[32]**॥** इति।

स्वरभक्तिं उच्चरन् दोषत्रयरहितमुच्चरेत् इत्यर्थः। ते च दोषाः इकारवत् उकारवदुच्चारणं एवं च ग्रस्तदोषं पूर्वेण रेफेण आक्रान्तं यथा भवति तथा इत्यर्थः। रेफद्वित्ववदिति यावत्। माध्यन्दिनशाखीयाः अत्र एकारवदुच्चरन्ति। तत्र प्रतिज्ञापरिशिष्टे पूर्वोक्तं प्रमाणमस्ति। किन्तु काण्वैस्तु इकार-उकारसादृश्यस्य निषेधात् ऋऌवर्णसदृशोच्चारणमेव

कर्तव्यम्। प्रातिशाख्ये तत्सादृशस्य आचार्येणोक्तत्वात्। सम्प्रदाये अपि तथैव पठ्यते।

**स्वरभक्तेः व्यञ्जनत्वम्**

प्रातिशाख्यव्याख्याकारेण अनन्तभट्टाचार्येण पूर्वोक्तप्रातिशाख्यसूत्र-व्याख्यायां अस्याः स्वरभक्तेः स्वरवर्णत्वमुत व्यञ्जनत्वमिति विचार्य ऋऌस्वरसदृशौ व्यञ्जने एव, अत एवार्धमात्रिकौ, अत एव अनयोः संयोगविघातकत्वं च नास्तीति प्रतिपादितम्। एवमेव शाखान्तरे स्वरभक्तित्वेन प्रसिद्धाविति च उक्तम्। तेन स्वरभक्तिः व्यञ्जनमेवेति ज्ञायते।

**स्वरभक्तेः पूर्वाङ्गत्वम्**

वर्णरत्नप्रदीपिकाशिक्षायां स्वरभक्तेः पूर्वाङ्गत्वं प्रतिपादितम्। तथाहि

**स्वरभक्तिश्च पूर्वाङ्गं देवम्बर्हिरुदाहृतिः**[33]। इति।

स्पष्टोऽर्थः। एवं च प्रकृते उदाहरणे बर्हिः इत्यत्र बकारोत्तरवर्तिनः अकारस्यैव स्वरभक्तिः रेफश्च अङ्गे भवतः। तेन रेफस्य स्वरभक्तेश्च अनुदात्तत्वमेव इति ज्ञायते।

**उपसंहारः**

एवं रूपेण शुक्लयजुर्वेदलक्षणग्रन्थेषु स्वरभक्तिविषयः उपलभ्यते। अयं च स्वरभक्तिः प्रायः उच्चारणकाले न दृष्टिपथमागच्छति। तथापि अयं वर्णः विद्यते इत्यत्र लक्षणग्रन्थाः एव प्रमाणम्। यद्यपि सम्प्रदाये पठ्यते एव। तथापि अज्ञात्वा एव गुरूणामुच्चारणमनुकृत्य उच्यते। न तु पृथग्वर्णत्वेन ज्ञात्वा। किन्तु ज्ञात्वा कर्माणि कुर्वीत इत्युक्तरीत्या वर्णानामुच्चारणमपि ज्ञात्वा कर्तव्यम्। एवमेव अज्ञात्वा उच्चार्यमाणाः यमवर्णादयः इतोऽपि सन्ति। तेषां ज्ञानं लक्षणग्रन्थाध्ययनेनैव सम्भवति। अतः सर्वैरपि वैदिकैः लक्षणाध्ययनं कर्तव्यम्। इत्यक्त्वा श्री वेङ्कटेशं प्रणमामि।

**सङ्केताक्षरसूची**

- **का.सं - काण्वसंहिता**
- **वा.प्रा - वाजसनेयिप्रातिशाख्यम्**
- **या.शि - याज्ञवल्क्यशिक्षा**
- **पा.शि - पाणिनीयशिक्षा**
- **बृ.शा.भा - बृहदारण्यकोपनिषत् शाङ्कर भाष्यम्**
- **का.श्रौ.सू - कात्यायनश्रौतसूत्रम्**
- **व.र.प्र.शि - वर्णरत्नप्रदीपिकशिक्षा**

**सहायग्रन्थसूची**

**1.शुक्लयजुर्वेदकाण्वसंहिता**

Chayamarthanda sampradayika shikhana samiti, Tirupati, 517501, PH:9494490886,9492632460.

**2.वाजसनेयिप्रातिशाख्यम्**

Chowkhamba Sanskrita pratishthan, 4360/4, New Delhi 110002

**3.याज्ञवल्क्यशिक्षा**

Opp.to chitra cinema. Bank of baroda building,chowk, Varanasi-221001

**4.शिक्षासन्ग्रहः**

Sampurnananda Sanskrit university, Varanasi-221002

**5. बृहदारण्यकोपनिषत् शाङ्कर भाष्यम्**

Geetapress gorakhapur, PIN:273005,

**6. कात्यायनश्रौतसूत्रम्**

Chowkhamba Sanskrita pratishthan,4360/4, New Delhi 110002

**पाद टिप्पणी**

[1]बृ.शा.भा.१-१

[2]का.श्रौ.सू.१-३-५

[3]का.श्रौ.सू.१-३-६

[4]का.श्रौ.सू.१-३-७

[5]का.श्रौ.सू.१-३-७

[6]पा.शि. ५२

[7]वा.प्रा. ८-४८

[8]वा.प्रा. ८-४९

[9]वा.प्रा. ८-५०

[10] वा.प्रा. ८-५१

[11] वा.प्रा. ८-२५

[12] वा.प्रा. ८- २५

[13] वा.प्रा. ८-३९

[14] या.शि उत्तरभागः - १७

[15] का.सं ९-५-२

[16] अकण्ठ्यो भावी (वा.प्रा. १-४६)

[17] ध्विशेषः (वा.प्रा १-५३)

[18] वा.प्रा ४-३६

[19] वा.प्रा ४-१७

[20] वा.प्रा १-१३७

[21] वा.प्रा. उव्वटव्याख्या ४-१७

[22] वा.प्रा अनन्तभट्टव्याख्या ४-१७

[23] या.शि उत्तरभागः १३

[24] या.शि उत्तरभागः १०,११

[25] का.सं २७-१-१

[26] या.शि उत्तरभागः ११,१२

[27] का.सं. ३०.२.१

[28] का.सं. २५.९.७

[29] का.सं. १२.३.१०

[30] का.सं. ५.१०.५

[31] का.सं. ६.२.८

[32] या.शि. उत्तरभागः १३

[33] व.र.प्र.शि. ५२